मेघदूतः संजीविनी समाख्येव्याख्यासहितः

५१३

१८ वै ३०

१२ पत्र

तत्रेति तत्र कैलासे अवश्यं सर्वथा सुरयुवतयो वलयकुलिशानि कंकणकोटयः शतकोटिवाचिना कुलिश
शब्देन कोटिमात्रं लक्ष्यते तेषामुद्घट्टनानि प्रहारास्तैरुद्गीर्णमुत्सृष्टं तोयं येन तं त्वां यंत्रधारा यंत्रधारा
गृहत्वं नेष्यंति प्रापयिष्यन्ति हे सखे घर्मनिदाघे लब्धस्य धर्मलब्धत्वादस्य देवभूमिसर्वर्तु सर्वदा
सर्वर्तुसमाहारात्साध्यमिति मेघनिदाघयोगान्माषाढस्य प्रथमेति न तव ताभ्यः सुरयुवतिभ्यो मोक्षो न स्याद्य
दि तदा क्रीडालोलाः क्रीडासक्ताः प्रमत्ता इत्यर्थः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिर्गर्जितैः करणैः भीष
येस्त्रासयेः अत्र हेतुभयाभावादात्मनेपदं न युगागमः ६५ तस्येति प्रणयिनः प्रियतमस्येव तस्य कैलासस्यो
त्संगे ऊर्ध्वभागे उत्संगस्त्वंगसंयोगे ... मिवेति मा त्वती मात्वना यो गंगादुकूलमस्युम्बवहम्मि
वेत्युपमितसमासः दुकूलं सूक्ष्मवस्त्रं स्यादुत्तरीये सितांशुक इति शब्दार्णवे अन्यत्र गंगेव दुकूलं न तस्त्रस्तय

वलायकुलिशो =

तत्रावश्यं कुलिशवलयोद्घट्टनोद्गीर्णतोयं नेष्यंति त्वां सुरयुवतयो यंत्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ६५
तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् । या वः काले
वहति सलिलोद्गारमुच्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ६६

स्रस्तां तां त्वं अलकां कुवेरनगरीं दृष्ट्वा कामचारिन् त्वं पूर्वमपि बहुकृत्वो दर्शनसंभवात् विज्ञानमसंभावित
मेवेति निश्चयार्थे नञ्द्वयप्रयोगः तदुक्तं संभूति निश्चयमिमर्थं पुनर्नञ्द्वयप्रयोगः उच्चैर्विमानाः उच्चैः तास सप्तभू
मिकभवनानि विमानोऽस्त्री देवयाने सप्तभूमौ सद्मनीति यादवः तानि यस्याः सा मेघसंवाहस्थानत्वं नार्थमिदं
विशेषणं अन्यत्र विमानानि क्रोपया अलका वो युष्माकं मेघकाल इत्यर्थः अभ्रवृन्दं मेघकदंबकं कामि
नी स्त्री मुक्ताजालैर्मौक्तिककेसरैः ग्रथितं प्रयुक्तं पुष्पसंघो मौक्तिके मुक्तेः इति यादवः अलकमिव चूर्णकुंत
लानीव जातावेकवचनं अलकाश्चूर्णकुंतला इत्यमरः वहति बिभर्ति अत्र कैलासस्यानुकूलनायक
त्वं अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते अकायत्तानुकूलः स्यादिति प्रियोपलालि
तां नित्यं स्वाधीनपतिका मतेति च लक्षयंति उदाहरंति चालालयन्नलं वशो नारनुचन्यत्र मंजरीए
तां विनोदयन्काननाछावदनुवर्तत इति ६६ इति श्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां मेघसंदेशव्याख्यायां संजीविन्यां पूर्वमेघः ॥

मे॰ विद्युद्वंतमिति यत्रालकायां ललिता रम्याः वनिताः स्त्रियो येषु ते सह चित्रेण वर्त्तंते इति सचित्राः आश्चर्य्यले
टी॰ ख्ययोश्चित्रमित्यमरः तेन सहेति तुल्ययोगे इति बहुव्रीहिः वोपसर्जनेति सहशब्दस्य सभावः संगीतायेतोर्य
१८ त्रिकाय प्रहतमुरजास्ताडितमृदंगाः मुरजा तु मृदंगे स्यात् ढक्का मुरजयोरपीति शब्दार्णवे मणिमया मणि
18 विकारा भुवो येषु ते अभ्रंलिहंतीत्यभ्रंलिहान्यभ्रंकषाणि अग्राणि शिखराणि येषां ते तथोक्ताः प्रतितुंगा इ
त्यर्थः प्रसादा एव वरहर्म्याणि प्रासादो देवभूभुजामित्यमरः विद्युतोऽस्य संतीति विद्युत्वंतं सेंद्रचापमिंद्रचा
पवंतं स्निग्धः आर्द्रो गंभीरो निर्घोषो गर्जितं यस्य तं अंतर्गतं तोयं यस्य तं तुंगमुन्नतं त्वां तैस्तैर्विशेषैर्ललित
वनितात्वादिधर्मैस्तुलयितुं समीकर्तुमलं पर्याप्ताः अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः ६२
हेमेति हे जलद हेमांभोजानां प्रसविजनकं मानसस्य सरसः सलिलमाददानः पिबन्नित्यर्थः तथैरा

विद्युद्वंतं ललितवनिताः सेंद्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषम्
अंतस्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ६२
हेमांभोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य धु
न्वन्वातैः सजलपृषतैः कल्पवृक्षांशुकानि नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेंद्रम् ६८

वतस्येंद्रगजस्य कामं चारित्वाद्युषितेव सेवार्थिमिंद्रागमनाद्यसमागम्येति भावः क्षणं जलदानकाले मुखप
टेन या प्रीतिस्तां कुर्वन् तथा कल्पद्रुमाणां किसलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणि अंशुकं
वस्त्रमात्रे स्यात्परिधानोत्तरीययोः सूक्ष्मवस्त्रे तनौ दीप्ताविति शब्दार्णवे वातैर्मंदवातैर्धुन्वन् नानाबहुवि
धाः अष्टौ लीलायमानाद्यो येषु तैर्ललितैः क्रीडितैः नाभावभेदस्त्रीसुलभललितं त्रिषु सुंदरे अस्त्रियां प्रमदा
गारे क्रीडिते जातपल्लवे इति शब्दार्णवे नगेंद्रं कैलासं कामं यथेष्टं निर्विशेः सम्यग्भुंक्ष्व निर्वेशो भृति
भोगयोरित्यमरः यथेष्टं विहारो मित्रगृहेषु मेध्याः फलं सहजमित्रं च ते कैलासः मेघपर्वतयोरब्धिसू १८
र्ययोरब्धिचंद्रयोः शिखीजीमूतयोः समीराग्न्योर्मित्रता स्वयमिति भावः ६८

शिप्रतिसर्वर्तुसंपत्तिमाह हस्तेइति यत्रालकायां वधूनां स्त्रीणां हस्ते लीलार्थं कमलं शरल्लिंगमेतत्
तदुक्तं शरत्पंकजलक्षणेति अलके कुंतले जातावेकवचनं अलकेष्वित्यर्थः बालकुंदैः प्रत्यग्रमाघ्यकुसु
मैरनुविद्धं कुटमभिधानं तथापि हेमंते प्रादुर्भावः शिशिरे प्रौढत्वमिति अवस्थाभेदेन हेमंतकार्यत्वमिमा
शयेन बालविशेषणमलकमिति प्रथमांतपाठे सप्तमीप्रत्ययभ्रमः स्यात् नाथस्तु नियतपुंल्लिंगमाह नि
भ्रतिटीकांतरमाह नटसतु स्तवकाएव लकानि तासां निश्लान्यलकानि यानि तन्मते रः रक्षोरर्थैः स्व
तिनद्यानादिपुंप्रयोगेषु नपुंसकलिंगतादर्शनादिति अनुविधोऽप्यनेन पुंसके भावे क्तः आनने मुखे लो
ध्रप्रसवानां लोध्रपुष्पाणां रजसा परागेण स्याद्गुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः
पांडुतां नीता श्रीः शोभा चूडापाशे केशपाशे नवकुरबकं वासंतं पुष्पविशेषः कर्णे चारुरूपं शले शिरीषं

हस्ते लीलाकमलमलके बालकुंदानुविद्धं नीता लोध्रप्रसवरजसा पांडुतामानने श्रीः
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं सीमंते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६६
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः
केकोत्कंठा भवनशिखिनो नित्यभास्वत्कलापा नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः

ग्रैष्मं पुष्पविशेषः सीमंते मस्तके केशवीथ्यां सीमंतमस्त्रियां मस्तके केशवीथ्या मुदाहृदमिति शब्दार्णवे
त्वदुपगमो मेघागमस्तज्जमित्यर्थः तत्रत्यानं वार्षिकमित्यर्थः नीपं कदंबकुसुमं सर्वत्रापीति शेषः अत्र त्रि
भवति पुरः प्रथमपुरुषः प्रयुज्यमानो स्यात्मीनिमायात् इत्यंकमलकुंदादिलिंगात्कार्यसमाहाराभिधाना
दर्थात्सर्वर्तुः समाहारसिद्धिः कारणं विना कार्यस्यासिद्धेरिति भावः ॥ ६६ यत्रेति यत्रालकायां पादपावृक्षा
:नित्यपुष्पाणि येषां तेन तथा ननु स्वनु नियमादिति भावः अतएवोन्मत्तैर्भ्रमरैर्मुखराः शब्दायमानाः नलि
न्यः पद्मिन्यो नित्यानि पद्मानि यासां तास्तथा ननु हेमंतवर्जितमित्यर्थः अतएव हंसश्रेणीभिरचितरसना
नित्यं हंससुपरिवेष्टिता इत्यर्थः भवनशिखिनः क्रीडामयूरा नित्यं भास्वंतः कालापा बर्हाणि येषां ते तथोक्ताः
:नतु वर्षास्वेव अतएव केकाभिरुत्कंठा उद्ग्रीवाः प्रदोषा रात्रयः नित्यज्योत्स्ना यासां ताः ननु शुक्लपक्षएव
व अतएव प्रतिहतानमसो

मे॰ टी॰ १९ आनंदेति यत्रालकायां वित्तेशानां यक्षाणां वित्ताधिपः कुबेरः स्यात्कुभो धनिकयक्षयोरिति शाश्वतः
आनंदोत्थमानंदजन्यमेव नयनसलिले अन्यैर्निमित्तैः शोकादिभिर्न इष्टसंयोगेन प्रियजनसमा
गमेन साध्यान्निवर्त्तनीयात् नत्वप्रतीकार्यादित्यर्थः कुसुमशरजात् स्मरजनितात्तापात्सन्तापा
न्नान्यस्मात् प्रणयकलहादन्यस्मात्कारणात् प्रियायोगोपपत्तिर्विरहश्चापि नास्ति किंच यौवनादन्यद्
१७ वयो वार्द्धकं नास्ति श्लोकद्वयं प्रक्षिप्तम् ११ यस्यामिति यस्यामलकायां यक्षा देवयोनिविशेषाः उत्तमस्त्रीस
हायाः ललिताङ्गनाः सहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चंद्रकान्तमयानि वा अत एव
ज्योतिषां तारकाणां छायाः प्रतिबिम्बान्येव कुसुमानि तैः रचितानि परिस्तृतानि ज्योतिश्छायाकुसुमभाञ्ज्वाला
इत्युत्तराधोधरान्मुखविनिवेशयन्ती एतेन प्रासादभूमेरम्लानशोभात्वमुक्तं हर्म्यस्थलानि तथा प्राप्य त्वद्गम्भीर
ध्वनिविधनिर्घोषाते पुष्करेषु वाद्यमुखेषु पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः शानन्दोत्थेमे

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैर्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्
नाप्यन्यत्र प्रणयकलहाद्विप्रयोगोपपत्तिर्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ११
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः आ
सेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु १२ मंदाकि
न्याः सलिलशिशिरैः सेव्यमाना मरुद्भिर्मन्दाराणामनुतटरुहां छायया वारितोष्णाः अन्वेष्टव्यैः
कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः १३

ततृत्यगीतयोरप्युपलक्षणं कल्पवृक्षप्रसूतं कल्पवृक्षसम्बन्धि तार्थं प्रदत्वान्मधु पितृप्रसूतं रतिफलं
यक्षस्तु इति फलाख्यं मधु मद्यमासेवंते आस्वादयन्तीत्यर्थः १२ मंदाकिन्या इति यत्रालकायां अमरैः प्रार्थ्यमानाः
रतेर्यत इत्यर्थः कन्यायस्तु कुमार्यः कन्या कुमारिका नार्यौ रितिविश्वः मंदाकिन्या गंगायाः सलिलैः शिशिरैः शी
तलैर्मरुद्भिः सेव्यमानाः सन्त्यः तथानुतटं तटेषु रोहन्तीत्यनुतटं रुहः तेषां मन्दाराणां छायया नातपेन वारि
तोष्णाः शमितातपाः सन्त्यः कनकस्य सिकतासु मुष्टिनिक्षेपेण गूढैः संवृतैः अत एवान्वेष्टव्यैः मृग्यैर्मणिभिः र
त्नैः संक्रीडन्ते गूढमणिसंज्ञया टेक्षिकक्रीडया सम्यक् क्रीडंत इत्यर्थः क्रीडोऽनुसंपरिभ्यश्चेत्यात्मनेपदं १३ १९

मे

नीवीति यत्रालकायां अनिभृतकरेषु चपलहस्तेषु प्रियेषु नीवीवसनग्रंथिः नीवीपणे च ग्रंथौ च स्त्रीणां जघनवा-
ससीति विश्वः नीव्येव बंधो नीवीबंधः नूतनत्वलवत्रपोनरुद्धस्तस्योच्छ्वसनेन त्रुटनेन शिथिलं श्लथं क्षौमं दुकूलं रा-
गादाक्षिपत्सु ह्रीमूढानां लज्जाविधुराणां बिंबं बिंबिका फलं बिंबफलं बिंबिकायाः प्रतिबिंबे च मंडलेऽपीति
विश्वः बिंबमिवाधरो यासां तासां बिंबाधराणां स्त्रीविशेषणमेतत् हि प्रचूर्णस्य पिष्टविशेषस्य मुष्टिः वि-
शेषा कामिनी कांताभीरु बिंबाधरांगनाः इति विश्वः रत्नान्येव प्रदीपानभिमुखं यथा तथा प्राप्यापि विफलप्रे-
रणा तदीयनिर्वाणत्वमत्वात् निष्फलो भवति वक्रवद्धांगुलो हस्तः उभयोर्मुष्टिरुच्यते इत्युज्वलः अत्रांगनानां
रत्नप्रदीपनिवारणप्रवृत्याभोगः व्यज्यते ७ नेत्रेति हे मेघ नेत्रा प्रेरकेण सततगतिना वायुना मातरिश्वा सदागति-
रित्यमरः यस्यामलकायां विमानानां सप्तभूमिकभवनानां अग्रभूमिरुपरिभूमिकाः नीताः प्रापिताः त्वामिव
पश्यतीति त्वत्सदृशा इत्यर्थः त्यदादिषु दृशोनालोचने कंचेति कञ्प्रत्ययः जलमुचो मेघाः आलेख्यानां सचित्रा

नीवीबंधोच्छ्वसितशिथिलं यत्र यत्रांगनानां क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु अर्चिस्तुं-
गानभिमुखमपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विमुखोप्रेरितश्चूर्णमुष्टिः ७ नेत्रा नी-
ताः सततगतिना यद्विमानाग्रभूमीरालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः शंकास्पृ-
ष्टा इव जलमुचस्त्वादृशा यत्र जालैर्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतंति ८ यत्र स्त्रीणां प्रि-
यतमभुजालिंगनोच्छ्वासितानामंगग्लानिं सुरतजनितां तंतुजालावलंबाः त्वत्संरोधापगमविश-
दैः प्रेरिताश्चंद्रपादैः व्यालुंपंति स्फुटजललवस्यंदिनश्चंद्रकांताः ९ णां चित्रलिखितरूपाणां सचित्राले-

ख्यानुयत्नतः निर्मितानामित्यमरः णि जलकणैर्दोषं स्फोटनमुत्पाद्य सद्यः शंकास्पृष्टा इव सापराधत्वा-
द्भयाविष्टा इव शंका वितर्कभययोरिति शाश्वतः धूमोद्गारस्य धूमनिर्गमस्यानुकृतावनुकरणे निपुणाः
कुशला जर्जरा विशीर्णाः सन्तः जालमार्गैर्गवाक्षरंध्रैः निपतंति निष्क्रामंतीत्यर्थः केचित्तु तः शुद्धसंचारत्वमा-
हुः तेन नेतृ ह्यत्र गृहस्य भूमिं प्रापितानि त्वत्सदृशानि व्यभिचारदोषमुत्पाद्य सद्यः सापशंकाः स्पृष्टा इव राजाराः
तज्जाराः मार्गैर्निष्क्रामंतीति तच्छ्रुतिरिति ध्वनिः प्रकृतार्थ शंकाः स्पृष्टा इवेत्युत्प्रेक्षा ८ यत्रेति यत्रालकायां निशीथे
अर्धरात्रे अर्धरात्रनिशीथौ द्वावित्यमरः त्वत्संरोधस्य मेघावरणस्यापगमेन विशदैर्निर्मलैश्चंद्रपादै-
र्जनितां ग्लानिं शरीरखेदं अवयवानां ग्लाननतामिति यावत् व्यालुंपंति अपनुदंतीति ९

20

मे० अलक्ष्येति सेतुत्थाकाः सख्याः लक्ष्यजेष्ठो प्राकार्ये इति निपातः ततो नञ्समासः भवनानामंतः अंतर्भवनं
टी० अव्ययं विभक्त्यादिना अव्ययीभावः अलक्ष्याः अंतर्भवने निधयो येषां ते तथोक्ताः यथेच्छाभोगसंभावनार्थमिदं विशे
२० षणं विबुधवनिताः अप्सरस एव वारमुख्या वेश्याः ता एव सहाया येषां ते तथोक्ताः वारस्त्रीगणिकावेश्यारूपाजी
वा इत्यमरः सत्कृता वारमुख्याः स्या इत्यमरः बहुलालापाः सभावितसंलापाः कामिनः कामुकाः अस्य हर्म्यस्य
हनि अव्ययं विभक्त्यादिना समासः रक्ताः मधुराः कंठा येषां तैः रक्तकंठध्वनिभिः किन्नरैः सार्धमित्यध्याहारः ध
नपतियशः कुबेरकीर्तिं गायद्भिरित्यध्याहार्यं देवगानस्य गांधारग्रामत्वात् तारतरं गायद्भिरित्यर्थः किन्नरैः सार्धंस
ह विभ्राजसंज्ञं वैभ्राजं चैत्ररथमिति ख्यायते तत्र विभ्राजे भगणेंद्रेणात्र तं वैभ्राजमाख्यायते शंभुरहस्ये चैत्ररथ
स्य नामांतरमेतत् बहिरुपवनं बाह्योद्यानं निर्विशंति अनुभवंति ॥ गतीति यत्रालकायां कामिनीनामभि
सारिकाणां निशि भवो मार्गः सवितुरुदये सति गत्यागमनेन लोलकंपस्खलनेन स्रस्तैः अलकेभ्यः पतितैर्मंदार

अक्षीणांतर्भवननिधयः प्रत्यहं रक्तकंठैरुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धं वैभ्राजाख्यं वि
बुधवनितावारमुख्याः सहाया बद्धालापा बहिरुपवनं कामिनो निर्विशंति ॥ गत्युत्कंपादलक
पतितैर्यत्र मंदारपुष्पैः पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च मुक्ताजालैः स्तनपरिसरच्छिन्नसू
त्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ॥ १८ मत्वा देवं धनपतिसखं यत्र साक्षाद्वसंतं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यं सभ्रूभंगप्रहितनयनैः कामिलक्ष्येष्वमोघैः तस्यारंभश्च
तुरवनिताविभ्रमैरेव सिद्धः ॥ १९ पुष्पैः हारतरुकुसुमैः तथा पत्रच्छेदैः पत्रलतानां छेदैः पतितैरिति शेषः

कर्णेभ्यो विभ्रश्यंतीति तैः कनककमलैः वक्ष्यति विबुधाः नार्यो लाभसति मयदा विधिकं अध्याहारः एव मम
पानसंधेयं तथा मुक्ताजालैर्मौक्तिककैसरैः ग्रथितानि हितैरित्यर्थः तथा स्तनयोः परिसरः प्रदेशः तत्र छिन्नानि
सूत्राणि येषां तैर्हारैश्च स्रस्यमानैस्तथा नैशो मार्गः पतितमंदारकुसुमादिलिंगैरयमभिसारिकाणां पंथा इत्यनुमीयत
इत्यर्थः ॥ १८ मत्वेति यत्रालकायां मन्मथः कामो धनपतेः कुबेरस्य सखा इति धनपतिसखः राजाहः सखिभ्य इति
टच् तं देवं महादेवं साक्षाद्वसंतं सखिसेहात्स्वनिजरूपेणाव वसंतं वर्तमानं मत्वा ज्ञात्वा भयात् ज्ञालेश्वरणभयात् षट्प
दा एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्येण न वहति न बिभर्ति कस्य तर्हि तस्य कार्यसिद्धिरत आह सभ्रूभंग इति त
स्य मन्मथस्यारंभः कामिजनविजयव्यापारः सभ्रूभंगप्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तेषु लक्ष्येषु
कामिन एव लक्षाणि तेष्वमोघैः सफलप्रयोगैरित्यर्थः मन्मथचापापेक्षया चिरप्रिमोघाः स्यादिति भावः च

कचधार्यं देहधार्यं परिधेयं विलेपनं चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकमिति रसाकरे तदेतदाह
वास इति यत्रालकायां चित्रं नानावर्णं वासो वस्त्रं परिधेयं मंडनमेतत् नयनयोर्विभ्रमाणामादेशे उपदे-
शे दक्षं समर्थं येन विभ्रमवृत्ति मधुनो मंडनत्वमित्यनुसंधेयं तच्च मंडनादि विदेहधार्यं तत्र भीक्ष्णं मधु मद्यं
किशलयैः पल्लवैः सह पुष्पोद्भेदं कुसुमसंचयं चेत्यर्थः इदं तु कचधार्यं भूषणानां विकल्पान् विशेषान् देह-
धार्यमेतत् तथा च चरणकमलयोर्न्यासस्य समर्पणस्य योग्यं रज्यतेऽनेनेति रागो रंजकद्रव्यं लाक्षैव रा-
गः लाक्षारागं च अंगरागादिविलेपनमंडनोपलक्षणार्थं सकलं सर्वं चतुर्विधमपीत्यर्थः अबलाम-
डनं योषिदलंकरणसाधनं जातमेकः कल्पवृक्ष एव सूते जनयति ननु नानासाधनसंपादनप्रयास इत्यर्थः ८०

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदं सह किशलयैर्भूषणानां विकल्पान्
लाक्षारागं चरणकमलन्यासयोग्यं च यस्यामेकः सूते सकलमबलामंडनं कल्पवृक्षः ८०
तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन य-
स्योपांते कृतकतनयः कांतया वर्द्धितो मे हस्तप्राप्यस्तवकनमितो बालमंदारवृक्षः ८१

इत्थमलकां वर्णयित्वा तत्र स्वसद्माभिज्ञानमाह तत्रेति तत्रालकायां धनपतिगृहात् कुबेरगृहादु-
त्तरेण तदुत्तरस्मिन्नदूरदेशे एनबन्यतरस्यामदूरेऽपंचम्या इत्येनप्प्रत्ययः एनपा द्वितीयेति द्वितीया
गृहाः पुंसि च भूम्न्येवेत्यमरः अथवा उत्तरेणेति न एनप्प्रत्ययांतं किंतु तोरणेनास्य विशेषणं द्वि-
तीयांतं धनपतिगृहादुत्तरस्यां दिशि यत्तोरणं बहिर्द्वारं तेन लक्षितमित्यर्थः अस्माकमिदमस्मदीयं
वृद्धाच्छ इति छप्रत्ययः आगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वादिंद्रचापसंदर्शेण
तोरणेन बहिर्द्वारेण दूराल्लक्ष्यं अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः अभिज्ञानांत-
रमाह यस्येति यस्यागारस्योपांते प्राकारांते पार्श्वदेशे मम कांतया वर्द्धितः कृतकतनयः कृत्रिमसुतः पुत्र-
त्वेनाभिमन्यमान इत्यर्थः हस्तेन प्राप्यैः हस्तापचेयैः स्तवकैर्गुच्छैर्निर्मितः स्यात् गुच्छकस्तु स्तवक इ-

मे॰ इतः पंचभिः श्लोकैरभिज्ञानान्तरमाह वापीति तस्मिन्मदीयागारे मरकतशिलाभिर्बद्धः सोपानमार्गो
टी॰ यस्याः सा तथोक्ता विदूरे भवा वैदूर्याः विदूराद्भवतीति ञ्यप्रत्ययः विदूर्याणां विकारा वैदूर्यं विकाराणि विकृ
२२ तार्थे अण्प्रत्ययः स्निग्धानि वैदूर्यमणिनालानि येषां तैर्हैमैः सौवर्णैः विकचकमलैः छन्ना व्याप्ता चास्ति
२१ त्रिशेषः अस्या वाप्यास्तोये कृतवसतयः कृतनिवासा हंसाः त्वां मेघं प्रेक्ष्यापि व्यपगतशुचो वर्षाकाले
पि व्यपगतः कलुषजलत्वाद्धेतोः शुचः शोकः संतः सन्निहितस्य गमममपीत्यर्थः मानसं नाध्यास्यन्ति नोत्कं
यिष्यन्ति आध्यानमुत्कण्ठास्मरणमिति काशिकायां ८२ तस्या इति तस्या वाप्यास्तीरे पेशलैश्चारु
भिः चारौ दक्षे च पेशल इत्यमरः इन्द्रनीलै रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनक

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ८२
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ८३

कदलीनां वेष्टनेन परिधानात्प्रेक्षणीयो दर्शनीय इत्यर्थः क्रीडाशैलोऽस्तीति शेषः हे सखे उपान्ते
षु प्रान्तेषु स्फुरितास्तडितो यस्य तं तथोक्तं इदं विशेषणं कदलीसाम्यार्थमुक्तं इन्द्रनीलसाम्यं तु मे
घस्य स्वाभाविकमित्यनेन सूच्यते त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतोस्तस्य शैलस्य मद्गेहिण्याः प्रि
यत्वादुत्कण्ठितोऽस्मीत्यर्थः कातरेण भीतेन चेतसा भयं चात्र सानन्दमेव वस्तूनामनुभूतानां तुल्यश्रव
णाद्दर्शनात् श्रवणात्कीर्तनाद्वापि सानन्दाभीर्य्यपामवेदीति रसाकरदर्शनात् तमेव क्रीडाशैल
मेव स्मरामि एवं विषयान्तरस्यावच्छेदार्थः स्वदृष्टावस्त्वनुभवादिष्टोऽपि स्मृतिर्जायत इत्यर्थः ८३ २१

रक्तेति अत्र क्रीडाशैले कुरवकाख्यवृत्तिरावरणं यस्य तस्य मध्ये वसंते भवा माधव्यस्तासां मंडपस्तस्याभि
मुक्तो लताग्रहस्य अभिमुक्तः पुंड्रकः स्याद्वासंती माधवीलतेत्यमरः प्रत्यासन्नोसन्निकृष्टो चलकिश
लयश्चलपल्लवः अनेन वृक्षस्य पादताडनाभ्याकटलितत्वमस्यते रक्ताशोकः रक्तविशेषणं तस्यस्म
रोद्दीपकत्वादुक्तं यस्मान्वेत्र शोकस्तु श्वेतो रक्त इति द्विधा बहुसिद्धिकरः श्वेतो रक्तोत्र स्मरवर्द्धन इ
त्यशोककल्पदृष्टिनात् कांतः कमनीयः केसरो वकुलो वंजुल इत्यमरः स्त इति शेषः एकस्तयोरन
रः प्राथमिकत्वादशोक इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः वामपादाभिलाषी दोहदछ
मनेनत्रापि संबंधनीयं अन्यः केसरो दोहदो वृक्षादीनां प्रसवकारणं संस्कारद्रव्यं तरुगुल्मलतादी
नामकाले कुशलैः कृतं पुष्पाद्युत्पादकं द्रव्यं दोहदः स्यात्तु क्रियेति शब्दार्णवे तस्य ब्रूमनायाआसे
नकपटोः स्त्रीव्याजरंभोपधयश्छद्मकेतवेद्वत्यमरः अस्यास्तव सख्या वदनमदिरां गंडूषमद्यं कांक्ष

रक्ताशोकश्चलकिशलयः केसरश्चात्र कांतः प्रत्यासन्नः कुरवकवृतेर्माधवीमंडपस्यैकः
सख्यास्तव सह मया वामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदछद्मनास्याः १४
तन्मध्ये च स्फटिकफलका कांचनी वासयष्टिर्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः
तालैः शिंजद्वलयसुभगैर्नर्तितः कांतया मे यामध्यास्ते दिवसविगमे नीलकंठः सुहृद्वः १५

तिमयासह त्वत्रापि संबंधनीयं अशोकवकुलयोः स्त्रीपादताडनं गंडूषमदिरा च दोहद इति प्रसिद्धिः स्त्री
णां स्पर्शात्प्रियंगुर्विकसति वकुलः सीधुगंडूषसेकात्पादाघातादशोकस्तिलककुरवकौ वीक्षणालिंग
नाभ्यां मंदारो नर्मवाक्यात्पटुमृदुहसनाच्चंपको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्क
र्णिकारः १४ तन्मध्य इति किं चेति चार्थः तन्मध्ये वृक्षयोर्मध्ये नातिप्रौढानामनतिकठोराणां वंशा
नां प्रकाश इव प्रकाशो येषां तैस्तरुणवेणुसच्छायैर्मणिभिर्मरकतशिलाभिर्मूले बद्धा कृतवेदिके
त्यर्थः स्फटिकमयं फलकं पीठं यस्याः सा कांचनस्य विकारः कांचनी सौवर्णी वासयष्टिर्निवासदं

मे° मेममकांतया नर्त्तितो वो युष्माकं सुहृत् सखा नीलकंठो मयूरः मयूरो बर्हिणो बर्ही नीलकंठो भुजंगभुगित्यमरः
टी° दिवसविगमे सायंकाले यां यष्टिकां अध्यास्ते यष्टिमास्ते इत्यर्थः अधिशीङ्स्थासां कर्मेति कर्मत्वाद्द्वितीया त
२२ आराभ्भमित्यारभ्य पंचसु श्लोकेषु क्षितिसम्बद्धं वस्तु वर्णितं नाटकालंकारः तदुक्तं तद्गुणान्तं भवेद्यत्र सम्बद्धं वस्तु
२२ वर्ण्यते इति ७८ एभिरिति हे साधो निपुण साधुर्निपुणो वेति काश्मिकायां हृदयनिहितैरविस्मृतैरित्यर्थः एभिः
पूर्वोक्तैर्लक्षणैर्लक्ष्यं लक्षणैश्चिह्नैरभिज्ञानैः द्वारोपांते इत्येकवचनमविवक्षितं पार्श्वयोरित्यर्थः लिखितौ च पुनः शङ्खा
तीयौ यौ शंखपद्मौ नाम निधिविशेषौ निधिर्ना शेवधिर्भेदाः पद्मशंखपद्मादयो निधेरित्यमरः दृष्ट्वा चनूनं सम्प्रति
अधुनेदानीमधुनेति निपातः मद्वियोगेन मम प्रवासेन मंदच्छायं उत्सवोपमां त्यां कांतिमद्भवनं मत्फैलक्षय
पाः निष्प्रभतया तयास्सूर्यापाये सति सकलं पद्मस्वाम्यमात्मीयमभिख्यां शोभामभिख्या नामशोभयोरित्यमरः

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा द्वारोपांते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा क्षामच्छा-
यं भवनमधुना मद्वियोगेन नूनं सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ७९ गत्वा सद्यः
कलभतनुतां शीघ्रसंपातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः अर्हस्यंतर्भवनपति-
तां कर्त्तुमल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ८० न पुष्यति नोपचिनोति ख

लु स्वां विरहितं पद्ममिव गृहं पतिविरहितं गृहं न शोभत इत्यर्थः ७९ निजगृहनिश्चयानंतरं कृत्यमाह ग
त्वेति हे मेघ शीघ्रसंपातः पतिरेव हेतुस्तस्य शीघ्रप्रवेशनार्थमित्यर्थः षष्ठी हेतुप्रयोगे इति षष्ठी संपातः पतिते
योगे प्रवेशे वेट संविटे इति शब्दार्णवे सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावस्तत्तां अल्प
शरीरतां गत्वा प्रथमकथिते तस्यास्तीरे इत्यादिना पूर्वोद्दिष्टे रम्यसानौ निषीदनयोग्य इत्यर्थः क्रीडाशैले निषण्णः
उपविष्टः सन् अल्पप्रकाराभाः प्रकाशो यस्यास्तां प्रकारे गुणवचनस्येति द्विरुक्तिः खद्योतानां मालिस्तस्या
विलसितेन स्फुरितेन निभां समानां विद्युन्मेषां विद्युत्प्रकाशः स एव दृष्टिस्तां भवनस्यांतरं तर्भवनं तत्र प
तितां प्रविष्टां कर्त्तुमर्हसि यथा कश्चित् किंचिदन्विष्यत् क्वचिदुत्तानो द्विःत्वा शनैः शनैरतितरां दूरीयसी २२
दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः ८०

संप्रति दृष्टिपातफलस्याभिज्ञानं श्लोकद्वयेनाह तन्वीति तन्वी कृशाङ्गी न तु पीवरी स्थूलाङ्गं तनु
कृशं तनु रित्यमरः वोतोगुणवचनादिति ङीप् श्यामा युवतिः श्यामा यौवनमध्यस्थेत्युत्पलमाला
या शिखराणि पाणिसंतीति शिखरिणः कोटिमन्तः शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति वि
श्वः शिखरिणो दशना दन्ता यस्याः सा एतेनास्याः भाग्यवत्त्वं पत्युः पुष्कलत्वं च सूच्यते पक्वं परिणतं
बिंबं बिंबिकाफलमिवाधरोष्ठो यस्याः सा शाकपार्थिवादित्वान्मध्यमपदलोपी समासः इति वामनः ना
सिकोदरोष्ठस्यादिना ङीष् मध्ये क्षामा कृशोदरीत्यर्थः चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्ट
यो यस्याः सा तथोक्ता एतेनास्याः पद्मिनीत्वं व्यज्यते तदुक्तम् चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे इति नि
म्ना नाभिर्गम्भीरनाभिः अनेन नारीणां नाभिगाम्भीर्यान्तस्तनस्यातिरेक इति कामसूत्रार्थः सूच्यते

तन्वी श्यामा शिखरदशना पक्वबिंबाधरोष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्न
नाभिः श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव
धातुः ८०

श्रोणीति श्रोणीभारादलसगमना मन्दगामिनी न तु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषदवन
ता न तु वपुर्दोषात् युवतय एव विषयस्तस्मिन् युवतिरतिकृत्यर्थः धातुर्ब्रह्मणः आद्या सृष्टिः
प्रथमशिल्पमिव स्थिता तत्र तस्मिन् प्रथमं निर्मिता युवतिरिवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रय
त्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यते इत्याद्यविशेषणं तथा चास्मिन् प्रपञ्चे न कुत्रापीदृशं
विधं रमणीयं रमणीयरत्नेष्वस्तीति भावः तदेवंभूता या स्त्री तत्रान्तर्भवने स्यात् तत्र वसतीति
त्यर्थः तामित्युत्तरश्लोकेन संबंधः ८०

मे॰ तामिति सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्र
टी॰ वाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव एकामेकाकिनीं स्थितां तां मं तत्र भवने गतो द्वितीयं जीवि
उ॰ तं जानीथाः जीवितुल्यां मन्ये यसीं अवगच्छेरित्यर्थः तन्वीत्यादि पूर्वलक्षणैरिति शेषः लक्षणाना
२३ मन्यथाभावधर्ममाशङ्क्याह गाढेति गाढोत्कण्ठां प्रबलविरहवेदनां रागोत्कलब्धविषये वेदनामहती
तं॰ ५ तु गात्राणां गाढोत्कण्ठा च विदुर्बुधा इत्यभिधानात् गुरुषु विरहमन्तुषु एषु दिवसेषु गच्छत्सु वर्तमाने शुशिशिरे
ण्त्ति शिशिरकालेन मथितां पद्मिनीमिव इव वदाय यथा शब्दा वितिटं डी अन्यरूपां पूर्वविपरीताकारां
जातां मन्ये पद्मिनी वान्यासदृशी जातेति तर्कयामीत्यर्थः एतावता नेयमन्येति भ्रमितव्यमिति भावः ॥१९॥

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकां
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये तुहिनमथितां पद्मिनीं वान्यरूपां ॥१९॥
नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया निश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठं
हस्तन्यस्तं मुखमसकलव्यक्ति लंबालकत्वादिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥२०॥

नूनमिति युग्मं प्रबलरुदितेन उच्छूने उच्छ्वसिते लब्धपुटे नेत्रे यस्य तत् उच्छूने विश्वपतेः क्तीरिक्तः स्यादि
त्यश्वेति निष्ठानत्वं वचिस्वपीत्यादिना संप्रसारणे संप्रसारणाच्चेति पररूपत्वं हलइति दीर्घः निश्वासानाम
स्र = शिशिरतया अनत्युष्णत्वेन भिन्नवर्णो विच्छायो धरोष्ठो यस्य तत् हस्तन्यस्तं एतेन चिन्ता व्यज्यते लंबाल
कत्वात् संस्काराभावात् लंबमानकुन्तलत्वात् असकलव्यक्ति असंपूर्णाभिव्यक्तिः तस्याः प्रियायाः मुखं त्वदनु
सरणेन त्वदुपरोधेन क्लिष्टकान्तेरिन्दोः दैन्यं शोच्यतां विभर्ति नूनमिति वितर्के नूनं तर्केऽर्थनिश्चये इत्यमरः
पूर्ववत्तथापि न भ्रमितव्यमिति शेषः ॥२०॥ ये॰ २३

सर्वविरहिणीसाधारणानि संभावनयोत्प्रेक्षमाणीत्याह आलोकेति त्रिभिः हे मेघ सा मत्प्रिया बलिषु नित्येषु प्रेषि-
तार्थेषु देवताराधनेषु व्याकुला व्यापृता वा विरहेण तनुं कृशं भावगम्यं लिखन्ती वा ततः कार्यस्याद्दृष्टचरत्वात् सं-
प्रति संभावनयोत्प्रेक्षितमित्यर्थः मत्सादृश्यं मदाकारसाम्यं मत्प्रतिकृतिमित्यर्थः यद्यपि सादृश्यं नाम प्रसिद्ध-
वस्तुगतं मदाकारसाम्यं तथापि प्रतिकृतत्वेन विवक्षितमिति इतरथा लेखनत्वासंभवात् अन्यत्र कोशे आलेख्ये च
सादृश्यमित्यभिधानात् लिखन्ती क्वचित् फलकादौ विन्यस्यन्ती वा चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः
एतच्च कामसूत्रस्य संवादेन सम्यग्विवेचितमस्माभिः रघुवंशसंजीविन्यां सादृश्यप्रतिकृतिदर्शनैः प्रियायाः इत्यत्र
मधुरवचनां मञ्जुभाषिणीं अत एव पञ्जरस्थां हिंस्रेभ्यः कृतरक्षणामित्यर्थः सारिकां स्त्रीपक्षिविशेषं पृच्छति रसिके भ-
र्तुः स्वामिनः स्मरसि किं कच्चित्कामप्रवेदने इत्यमरः भर्तारं स्मरसि किं अधिगमार्थदयेशां कर्मणीति कर्मणि षष्ठी
स्मरणे कारणमाह हि यस्मात्कारणात् त्वं तस्य भर्तुः प्रीणातीति प्रिया इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः अतः

आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती पृच्छ-
श्री = न्ती वा मधुरवचनां सारिकां पञ्जरस्थां कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ८१ उत्संगे
वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा तन्त्रीमार्द्रां नय- ना ४
नसलिलैः सारयित्वा कथंचिद्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ८२ प्रेमास्पदत्वात्सम-

त्वमर्हसीति भावः इत्येवं पृच्छन्ती वा वाशब्दो विकल्पे उपमायां विकल्पे चेत्यमरः ते तवालोके दृष्टिपथे पुरा निप-
तति सद्यः पतिष्यतीत्यर्थः स्यात्प्रबन्धे पुरातने निकटागामिके पुरेत्यमरः यावत्पुरानिपातयोर्लडिति लट् ८१
उत्संगेति हे सौम्य साधो मलिनवसने प्रोषिते मलिनाकृष्टा तिष्ठासत्या इत्यर्थः उत्संगे तु रो वीणां निक्षिप्य मम गो-
त्रं नामाङ्कं चिह्नं यस्मिन् तत्तन्नामाङ्कं यथा तथा गोत्रं तु नाम्नि चेत्यमरः विरचितानि पदानि यस्य तत्तथोक्तं गेयं
गानार्हं प्रबन्धादिगीतमित्यर्थः पाठे स एवार्थः उद्गातुमुच्चैर्गातुं कामो यस्याः सा उद्गातुकामा मनसोऽपीति मकारलो-
पः दैवयोनित्वात् गान्धारग्रामं गातुकामेत्यर्थः तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः न तु गान्धारना-
मानं स लभ्यो देवयोनिभिरिति तथा नयनसलिलैः प्रियतमस्मृतिजनितैरस्रुभिरार्द्रां तन्त्रीं कथंचित्सारयि-
त्वा आर्द्रत्वात् करेण प्रमृज्य अन्यथा क्वणनासंभवादिति भावः भूयो भूयः पुनः पुनः स्वयमात्मना कृताम

मे॰ शेषानिति अथवा विरहस्य दिवसस्थसात्स्थापितस्य ततआरभ्य निश्चितस्यावधेरंतस्य शेषान्गतशिष्टान्
टी॰ मासान्देहलीदत्तपुष्पैः देहली द्वारपिंडाखाधारदारु गृहावग्रहणी देहल्यंगणम् इत्यमरः तत्रदत्तानि राशित्वेन
२४ निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादि संख्यानेन भुवि भूतले विन्यस्यंती वा पुष्पविन्यासेन मा
24 सान् गणयतीत्यर्थः वा हृदये निहितो मनसि संकलित आरंभ उपक्रमो यस्य तं अथवा हृदये निहिता
श्चुंबनादयो व्यापारा यस्मिन् तं तं मत्संयोगं रतिमास्वादयंती वा लोक इति संबंधः ननु कथमयं निश्चय इत्याहिवा
व्यापीतरस्मासे न परिहरति प्रायेण बाहुल्येनांगनानां रमणविरहेष्वेते पूर्वोक्ता विनोदाः कालयापनोपायाः
एतेन संकल्पावस्थोक्ता तदुक्तं संकल्पोनामविषयमनोरथ उदाहृत इति ५३ सव्यापारामिति हे सखे

शेषान्मासान्नामनदिवसस्थापितस्यावधेर्वा विन्यस्यंती भुवि गणनया देहलीमुक्तपुष्पैः
मत्संयोगं हृदयनिहितारंभमास्वादयंती प्रायेणैते रमणविरहेष्वंगनानां विनोदान् ५३
सव्यापारामहनि न तथा पीडयेन्मद्वियोगः शंके रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे तामुन्निद्रामवनिशयनां सौधवातायनस्थः ५५

अहनि दिवसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगो मद्विरहस्तथा ते
न प्रकारेण प्रकारे गुणवचने तिथा लिति थाल्प्रत्ययः न पीडयेत् यथा रात्राविति शेषः किंतु रात्रौ निर्विनोदां
निर्व्यापारां ते सखीं गुरुतरा शुक् यस्याः तां अतिदुर्भरदुःखां शंके तर्कयामि शंका वितर्के भययोरिति शाश्वतः अव
तो निशीथे ऽर्धरात्रे उन्निद्रां मुक्तस्वप्नां निद्रां अवनिरेव शयनं शय्या यस्यास्तां नियमार्थं स्थंडिलशायिनीं सा
ध्वीं पतिव्रतां साध्वी पतिव्रतेत्यमरः अतो नान्यथा शंकितव्यमिति भावः तां त्वत्सखीं मत्संदेशैर्मदुक्ताभिः सु
खयितुमानंदयितुमलं पर्याप्तः समर्थः सौधवातायनस्थः सन् पश्य सखा धात्री च पितरो मित्रं हृतं सुकारयः सु २४
खयंतीह कथं नसखोपायेर्वियोगिनीति रसरत्नाकरे हृतस्याप्ययं मेव इति भावः अनेन जागरावस्थोक्ता ५४

प्रन स्तायेव विशिनष्टि, आधिक्षामामिति चतुर्भिः आधिना मनोव्यथया क्षामां कृशां पुंस्याधिर्मानसी व्यथेत्यमरः
क्षायतेः कर्तरि क्तः क्षायो मः इति निष्ठातस्य मकारः विरहे शयनं तस्मिन् पल्लवादिरचिते इत्यर्थः सन्निषण्णमेक
पार्श्वं यस्यास्तां प्राच्याः पूर्वस्या दिशो मूले उदयप्रान्त इत्यर्थः प्राचीग्रहणं तीक्ष्णावस्थाद्योतनार्थं कलामात्रं कले
व शेषो यस्यास्तां हिमांशोश्चन्द्रस्य मूर्त्तिमिव स्थितां तथा या रात्रिर्मया सार्धमिच्छया कृतानि रतानि तैः शाकपार्थिवादि
त्वान्मध्यमपदलोपी समासः क्षणमिव नीता यापिता तां तज्जातीयामेव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमा
नामुष्णैरश्रुभिर्यापयन्तीं यातेर्ण्यन्तात् पुक्प्रत्ययः अर्त्तिह्रीव्लीरी इत्यादिना पुगागमः स एव कालः सुखिनमल्पः प्रतीय
ते दुःखिनां तु विपरीत इति भावः एतेन कार्श्यावस्थोक्ता ॥४५॥ पादानिति जालमार्गप्रविष्टाञ्जालान्तरविवरगतान मृ २
मृतशिशिरान् इन्दोः पादान् रश्मीन् पूर्वप्रीत्या पूर्वस्नेहेन पूर्ववदानन्दकरा भविष्यन्तीति बुद्ध्येति भावः अभिमु
खं यथा तथा गतं तथैव सन्निवृत्तं तदा तेषामतीव दुःसहत्वादिति भावः चक्षुः खेदात् सलिलगुरुभिरश्रु

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः । नीता रा महतीं
त्रिः क्षणमिव मया सार्धमिच्छारतैर्या तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीं ॥४५॥ पादानिन्दोर
मृतशिशिरान् जालमार्गप्रविष्टान् पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव चक्षुः खेदात्सलिल खे २
गुरुभिः पक्ष्मभिश्छादयन्तीं साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्तां ॥४६॥ निश्वासेनाधरकिशल
यक्लेशिना विक्षिपन्तीं शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बं मत्संयोगः कथमुपनयेत् स्वप्नजो
पीति निद्रामाकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशां ॥४७॥

भरैः पक्ष्मभिश्छादयन्तीमत एव साभ्रे दुर्दि
ने ह्नि दिवसे न प्रबुद्धामिद्धावरणाद् विकासितां न सुप्तां मुकुलितां स्थलकमलिनीमिव स्थितां ॥४६॥ निश्वासेति शु
द्धस्नानात् तैलरहितस्नानात् परुषं कठिनस्पर्शं नूनं निश्वासेन फूत्कारेणागण्डलम्बं सुप्सुपेति समासः अलकं
चूर्णकुन्तलान् जातावेकवचनं अधरकिशलयं क्लेशयति क्लिश्नातीति वा ताच्छील्ये णिनिः निश्वासेन निक्षिपन्तीं
चालयन्तीं तथा स्वप्नजोपि स्वप्नावस्थाजन्योपि सा सम्भोगासंभवादिति भावः मत्संभोगः कथं केनापि प्रकारेणो
पनयेदागच्छेदित्याशयेनेति शेषः प्रार्थनायां लिङ् इति नयनसलिलोत्पीडेनाश्रुवृष्ट्या रुद्धावकाशामाक्रान्त
स्थानां दुर्लभामित्यर्थः निद्रामाकांक्षन्तीं स्नेहानुरक्तत्वादिति भावः अत्राश्रुविसर्जनेन लज्जात्यागो व्यज्यते ॥४७॥

मे
टी॰
२५
शा॰ड्री
25

सेति अबला दुर्बला संन्यस्ताभरणं कृशत्वात् परित्यक्ताभरणा असकृद्दत्तेन कृष्णाद्दुःखदुःखेन प्रकारेण दुःखेन च नस्येति द्विभि
र्वः शय्योत्संगे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती अनेनात्यन्तासक्ता मूर्छावस्था सूच्यते सा त्वत्सखी त्वा
मपि नवजलमयं नवाम्बुरूपमस्रं बाष्पं सर्वथा मोचयिष्यति पश्चाद्दित्वा हि कर्मकर्तृत्वं तथा हि प्रायः प्राचुर्येण आर्द्रान्तरात्मा
मृदुहृदयो मेघस्त्वं द्रवान्तः शरीरः सर्वः करुणामयी प्रवृत्तिरन्तःकरणवृत्तिर्यस्य सः करुणार्द्रवृत्तिर्भवति प्रियसखा
टस्मिन्नवसरे सर्वथा त्वया शीघ्रं गन्तव्यमनेनान्तरं [illegible] पटस्यपरिहारयेति संदर्भाभिप्रायः ९८ आद्य इति आद्ये वि
रहदिवसे दाममालां हित्वा त्यक्त्वा या शिखा बद्धा यथा शापस्यान्ते विगलितशुचा वीतशोकेन मया उद्वेष्टनीया मो
चनीया स्पर्शक्लिष्टा स्पर्शसति मूलं केशेषु सव्यथा मित्यर्थः कठिना रूक्षा विषमा च ताम् एकवेणीमेकीभूतवेणीं
पूर्वकालेत्यादिना नानुरूपः तां शिखां अयमिता वृद्धिं प्राप्ताः नखाः यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात्

सा संन्यस्ताभरणमबला पेशलं धारयन्ती शय्योत्संगे निहितमसकृद्दुःखदुःखेन गात्रम् त्वा
मप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ९८ आद्ये
बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयां स्पर्शक्लि
ष्टामयमितनखेनासकृत्सारयन्तीं गण्डाभोगात्कठिनविषमामेकवेणीं करेण ९९ जाने सख्यास्तव
मयि मनः संभृतस्नेहमस्मादित्थंभूतां प्रथमविरहे तामहं तर्कयामि वाचालं मां न खलु सुभग
मन्यभावः करोति प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् १०० असकृत्पुनः पुनः सारयन्तीं अप

सारयन्तीं ताम् अपनयन्तीति पूर्वेण संबंधः ९९ नन्वीदृशीं दशां मा पश्यन् कथं त्वया निश्चितमत आह जान इति हे मेघ
तव सख्या मनो मयि संभृतस्नेहं संचितानुरागं जाने अस्मात्स्नेहज्ञानकारणात्प्रथमविरहे प्रथमसंगहरणे दुःखो
ति शय्यायां त्वत्सखीमित्थंभूतां तर्कयामि ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकट
नं तत्राह वाचालमिति सुभगमात्मानं मन्यत इति आत्ममाने खश्चेति खश्प्रत्ययः अरुर्द्विषदजन्तस्य मुम् इति
नुम् तस्य भावः सुभगंमन्यभावः सुभगमानित्वं वाचालं बहुभाषणं न करोति सौभाग्याभिमानित्वेन प्रकथया द
मीत्यर्थः स्यात्कुत्स्याकल्पवाचालो वाचाटो बहुगर्ह्यवागित्यमरः किं तु हे भ्रातः मया यदुक्तं तट खिलं आधिता
मासि [illegible] त्यादि यदुक्तं तत्सर्वं प्रत्यक्षं भविष्यतीति शेषः १००

रुद्धेति अलकैः रुद्धः अपांगयोः प्रसरो यस्य तत्तथोक्तं त्वय्यासन्ने सति स्वकुंतलवार्तां शृण्वतीति शेषः
उपर्यूर्ध्वभागे स्पन्दते स्फुरतीत्युपरिस्पन्दि नयनं वाममिति शेषः वामभागस्तु नारीणां श्रेष्ठः पुंसस्तु दक्षि
णः इत्युक्तत्वात् दृष्टिस्फुरणायां स्पन्दनेऽलंकरणेपि चेति स्त्रीणां वामभागप्राशस्त्यात् मीनक्षोभात् मीनचलनाच्च
लस्य कुवलयस्य श्रिया शोभया तुलां सादृश्यमेष्यतीति शंके तर्कयामि तुल्यार्थैरतुलोपमाभ्यां तृती
यान्यतरस्यां योगे तृतीया ९१ वामश्चेति मदीयैः कररुहपदैर्नखपदैः पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रि
यामित्यमरः मुच्यमानः परित्यज्यमानः नखांकरहित इत्यर्थः चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौ
क्तिकसारमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः संप्रति नखपदोद्यमाभावेन शोभितोपचाररहित

रुद्धापांगप्रसरमलकैरंजनस्नेहशून्यं प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासं
त्वय्यासन्ने नयनमुपरिस्पन्दि शंके मृगाक्ष्या मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ९१
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैर्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या
संभोगांते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तंभगौरश्चलत्वं ९२

स्तस्यैव यष्टेरिति भावः पचादित्वादकर्मकत्वं संभोगांते मम हस्तसंवाहनानां हस्तेन मर्दनानां
संवाहनं मर्दनं स्यादित्यमरः समुचितो योग्यः सरसोऽद्रवभावः परिपक्वो न शुष्क इत्यर्थो विवक्षितः तत्रैव
पांडित्यसंभवात् स चासौ कदलीस्तंभश्चेति स इव गौरः पांडुरः गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेपि
चेति मालतीमालायां अस्याः प्रियायाः वामश्चारुः चलत्वं स्पन्दनं यास्यति प्राप्स्यति ऊरोः स्पंदे रतिं वि
द्यात् दूर्वाः प्राप्तिः स्त्रवाससः इति निमित्तनिदाने ९२

१ त्यक्तेण स्वप्नलब्धे सति॥

मे. टी. २६

तस्मिन्निति हे जलद तस्मिन्काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया सा स्याद्यदि सा चेत्
एनां निद्राणां मत्त्र्यां सम्प्रश्नादासित्वेत्यर्थः तत्रासीनः सन् उपसर्गविघ्नात्मककर्णकलत्व स्तनितविमुखो गर्जितपराङ्
मुखो निःशब्दः सन् सम्प्रणा निद्राभंगः स्यादिति भावः याममात्रं प्रहरमात्रं सोयामः प्रहरो सममाविन्यमरः
सहस्व प्रतीक्षस्व प्रार्थनायां लोट् प्रणयोरेकवारं स्मरतस्य यामावधिकत्वात्समये तितथा भवितव्यमित्यभि
प्रायः तथा चरतिसर्वस्वे एकवारावधिर्यामो रतस्य परमो मतः चंडूशक्तिमतोर्यूनो रूपन्नटक्रमवर्तिनोरिति
यामसहनस्य प्रयोजनमाह माभूदिति अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथंचिल्लब्धालिंगनस्य वि
घातो माभूदित्यर्थः गाढोपगूढं गाढालिंगनं नपुंसके भावे क्तः कंठात् च्युतस्त्यक्तो भुजलतयोर्ग्रंथिर्बंधो यस्य
तन्माभूत्स्यात्तु कथंचिल्लब्धालिंगनस्य विघातो माभूदित्यर्थः न चात्र निद्रा किं स्यात् निद्रामिति पूर्वोक्तेन वि
रुध्यते पुरः सम्भोगावस्थायास्तु पातिक निद्रासंभवात् तथा रसरत्नाकरे अपरार्क्षी रतदनं निद्रा निर्द्वंदिन र्थवा

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्यात्तत्रासीनः स्तनितविमुखो याममात्रं सहेथाः ।
माभूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचित्सद्यः कंठच्युतभुजलताग्रंथि गाढोपगूढं ॥ ४२ ॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ४३ ॥

प्रथमः सुप्ता हि पुं जायते दृष्ट्वा मेटेषु वामनेकेति ४२ तामिति तां प्रियां स्वस्य जलकणिकाभिर्जलबिंदुभिः शीत
लेनानिलेनोत्थाप्य प्रबोध्य एतेन तस्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते यथाह भोजराजः मृदुभिर्मिरीलैः
पादैः शीतैर्व्यजनकैस्तलेनोष्मतो च मधुरैर्गीतैर्निद्रातो बोधयेत्प्रभुमिति अभिनवैर्मालतीनां जालकैः समं जातीकुड्
मलैः सह सुमना मालती जातिः स्यात् ... लीवे कलिकाकोरकः पुमानिति चामरः
प्रत्याश्वस्तां शिथिलतां त्यक्त्वा पुनरुच्छ्वसितां आश्वसेः कर्त्तरि क्तः एतेनास्याः सौकुमार्यं गम्यते त्वत्सनाथे त्वत्सहिते सनाथप्र
भुमध्याक्रः सहितेति वित्तनापिनीति शब्दार्णवे गवाक्षे स्तिमितनयनां कोसा विति विस्मयान्निश्चलनेत्रां मानिनीं जानी
नो चित्यासहितां स्तु मित्यर्थः विद्युद्गर्भः अन्तःस्था यस्य सः अन्तर्लीनविद्युद्ध्वक्तः गर्भो स्यावरकेतरस्य गर्भेण कुक्षि
णा भवि इति शब्दार्णवे दृष्टिप्रतिघातेन वक्तुं मुखावलोकनप्रतिबंधकत्वात्त्वद्योतितमित्यभि भावः धीरो धृष्ट

छं ४५ शाक्को ४५ लं ४४

संप्रति हृतस्य शोकजनानभीम्सलीकरणे चातुरीं न परिहर्तुं भर्त्तुरिति विधवागतभर्तृकान भवतीति सभर्तृके
अनेन भर्तृजीवनसूचनात् अनिष्टागमनशंकां वारयति मां तव पत्युः प्रियं मित्रं प्रियसुहृदं तथा पिहृदयनिहितैर्मन
सि स्थापितैस्तत्संदेशैः त्वत्समीपमागतं भर्तृसंदेशकथनार्थमागतमित्यर्थः अम्बुवाहं मेघं विद्धि जानीहि न केवलमस
हं वार्त्ताहरः किं तु ईदृक्कोपीत्याह यो वृन्दानि बलानां स्त्रीणां वेणयस्तासां मोक्षे उत्सुकानि पथि श्रान्ततां गतानि मार्गश्रान्तानां प्रो
षितानां प्रवासिनां पान्थानामित्यर्थः वृन्दानि सार्थान् त्वरयति पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति
भावः ९५ भर्त्तुः सत्यादितापनस्य फलमाह इतीति इत्येवमाख्याते पवनतनयं हनूमन्तं मैथिलीसीतेव सा मत्प्रिया उन्
मुखी उत्कंठेनोन्मुखेनोच्छ्वसितहृदया विकसितचित्ता च सती त्वद्वीक्षणं संभाव्य सत्कृत्यास्मात्परं मे तीत्रापनोत्यरसं
श्रोतव्यं अवहिता ... सती श्रोष्यति अत्र सीताहनुमदुपसंख्यानात् अस्याः पातिव्रत्यं मेघस्य दूतगुणसंपत्तिश्च व्यज्य
ते तत्क्षणमुत्सुरसंकरे ब्रह्मचारी बलीधीरो मायावी मानवर्जितः धीमान् दूतो ... दूतः ... इति ननु
वार्त्तामात्रश्रवणादस्याः को लाभस्तत्राह कान्तोदन्तः ... हे सौम्य साधो सीमन्तिनीनां वधूनां नारीणां सीमन्तिनीवधू

भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं तत्संदेशैर्मनसि निहितैरागतं त्वत्समीपं यो वृन्दानि त्वर
यति पथि श्रान्तानां प्रोषितानां मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ९५ इत्याख्याते प
वनतनयं मैथिलीवोन्मुखी सा त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवं श्रोष्यत्यस्मात्पर
मवहिता सौम्य सीमन्तिनीनां कान्तोदन्तः सुहृदुपनतः संगमात्किंचिदूनः ९६ अङ्गेनाङ्गं प्रतनु
तनुना गाढतप्तेन तप्तं साश्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन उष्णोच्छ्वासं समधिकतरोच्छ्वा
सिना दूरवर्ती संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ९७ ... 

तः प्राप्तः ... विप्रलम्भशंकां ... कान्तोदन्तो वार्त्ता ... वार्त्ताप्रवृत्तिर्वृत्तान्त ... संगमात्
संगमात्कान्तसंपर्कात् किंचिदूनः ईषदूनः ... कारी त्यर्थः ९६ अङ्गेनेति किं च हे ... दूरस्थः ...
... वैरिणा विरोधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढतप्तेन तापतप्तेन
तप्तेन साश्रेणाश्रुणा ... उत्कण्ठावता ... उत्कण्ठितेन ... उत्कण्ठा
... समधिकतरोच्छ्वासिना दीर्घनिश्वासेनेत्यर्थः अङ्गेन स्वशरीरेण ... तनु ... 
... उष्णोच्छ्वासं ... अविरतोत्कण्ठमविच्छिन्नवेदनं उष्णोच्छ्वासं ... निःश्वासं ... 
... संकल्पैर्मनोरथैर्विशत्येको

मे॰ टी॰ २७ संप्रति स्वावस्थां निवेदनाय प्रस्तौति शब्दाख्येयमिति हे अबले यस्ते प्रियः सखीनां पुरस्तादग्रे आननस्पर्श-
लोभात् मुखसंपर्कलोभात् गाढ्यात् शब्दाख्येयं शब्देन रवेण आख्येयं श्राव्यं वाच्यमपि यत्तद्वचनमपीति शेषः कर्णे
कथयितुं लोलो लालसोऽभूत्किल लोलुपो लोलुभो लोलो लालसो लंपटोऽपि चेति यादवः श्रवणविषयं कर्ण-
27 पथमतिक्रान्तः तथा लोचनाभ्यामदृश्यः अतिदूरत्वात् श्रोतुं द्रष्टुं न शक्त इति भावः स ते प्रियस्त्वामुत्कण्ठया
विरचितानि पदानि सुप्तिङन्तशब्दाः वाक्यानि च यस्य तत्तथोक्तं पदे शब्दे च वाक्ये चेति विश्वः इदं वक्ष्यमाणं
मन्मुखेनाह मत्प्रबन्धेनेन स एव वक्तुं न इत्यर्थः ४८ सदृशप्रतिकृतिस्वप्नदर्शनतदंगस्पृष्टस्पर्शाख्या-
नि चत्वारि विरहिणां विनोदस्थानानि तथा चोक्तं पताकायां वियोगे चायोगे प्रियजनसदृशानुभवनं तत-
श्चित्रं कर्म स्वप्नसमये दर्शनमपि प्रतीकारोऽनंगव्यथितमनसां कोऽपि गदित इति तत्र सदृशवस्तुदर्शनमा-

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात् कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्यस्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४८॥
श्यामास्वंगं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् हन्तैकस्थं क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥४९॥ रा–

ह श्यामास्विति श्यामासु प्रियंगुलतासु श्यामा तु महिलाह्वया लता गोवन्दनी गुन्द्रा प्रियंगुः फलिनी
फलीति चामरः अंगं शरीरमुत्पश्यामि संभावयामि सौकुमार्यादिसाम्यादंगमिति तर्कयामीत्यर्थः तथा चकितहरिणी-
नां प्रेक्षणेषु दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनु-
षु स्वल्पासु नदीनां वीचिषु भ्रूविलासान् उत्पश्यामीति सर्वत्र संबध्यते तथापि नाति भ्रम मनो निवृत्तिरित्याश-
येनाह हन्तेति हन्त विषादे हन्त हर्षेऽनुकम्पायां वाक्यारंभविषादयोरित्यमरः हे चण्डि कोपने चण्डस्त्वत्यन्तकोपन
इत्यमरः गौरादित्वान्ङीष् उपमाकथनमात्रेणैव कोपितवत्यसीति भावः क्वचिदप्येतस्मिन्नपि वस्तुनि २७
च सादृश्यं नास्ति अतो न निर्वृणोमीत्यर्थः एतेनास्याः सौंदर्यमनुपममिति व्यज्यते ४९ संप्रति प्रति-

त्वामालिख्येति हे प्रिये प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थामुक्तां त्वामित्यर्थः धातवो गैरिकादयस्तएव रागा रंजकद्रव्याणि चीनादिरंजकद्रव्येला (?) लिविषयद्वयोः यागादो चापि रागः स्यात् २४२
एयरंजनेष्विमानि तिशाल्काणे वेनैर्धातुरागैः शिलाशृष्टे आलिख्य निर्माय आत्मानं मां मत्तं तिमित्यर्थः ते तव वि दृति ४२
त्रगतायाइत्यर्थः चरणपतितं कर्तुं तथालिखितं तु यावदिच्छामि तावद्धिक्तसमकालं मुहुरुपचितैः प्रवृ
द्धैरस्रैरश्रुभिः कर्तृभिः असकृत्स्थूलाश्रुपातेनमिति विग्रहः मे दृष्टिरालुप्यते आव्रियत इत्यर्थः ततो दृष्टिप्र
तिबंधात्लेखनं प्रतिबध्यते इति भावः क्रूरो घातुकः न्नृशंसो घातुकः क्रूरः इत्यमरः कृतान्तो यमस्तस्मिन्नपि
चित्रेपि नौ आवयोर्युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वानावितिनावादेशः संगमं नसहते संगमले
खनमपि आवयोरसहमाने दैवमावयोः संगमं न सहत इति किं न्वक्तव्यमित्यपि शब्दार्थः ११ अधुनास्व

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ११
मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु पश्यं
तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति १११

प्रदर्शनमाह मामिति स्वप्नस्य विज्ञाने स्वप्नः स्वप्नः स्वप्नस्य विज्ञानमित्यमरः दर्शनं संवित् दर्शने समये
दर्शनं समये प्रज्ञात्रेहष्टो स्वप्नेष्विति संविदीतिशब्दार्णवे स्वप्न इति दर्शनानि स्वप्नज्ञानानि चूतत्वाद्दिवसा
मान्यविशेषभावेन सहप्रयोगः तेषु मया कथमपि महता प्रयत्नेन लब्धायाः गृहीतायाः दृष्टाया इति यावत्
ते तव निर्दयाश्लेषो गाढालिंगनं स एव हेतुस्तस्य निर्दयाश्लेषार्थमित्यर्थः षष्ठी हेतुप्रयोग इति षष्ठी आका
शे निर्विषये प्रणिहितभुजं प्रसारितबाहुं भुजं मां पश्यन्तीनां वनस्थलीनां मुक्ता मौक्तिकानीव स्थूला अश्रु
लेशा बाष्पबिंदवः तरुकिसलयेषु अनेन चेलांचलेनाश्रुधारणसमाधिर्ध्वन्यते बहुशो न पतन्तीति नापितु
पतन्त्येवेत्यर्थः निश्चयेन नञ्द्वयप्रयोगः तथा चाधिकारसूत्रं निश्चयनिर्देशार्थेषु नञ्द्वयप्रयोग इति म
हात्मनां गुरुदेवतानामश्रुपातः क्षितौ यदि देशभ्रंशो महादुःखं मरणं च भवेद्ध्रुवमिति क्षितौ देवताश्रु

मे॰
टी॰
२८
28

इदानीं तदंगस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति देवदारुद्रुमाणां किशलयपुटान् पल्लवपुटान् सद्यो भित्त्वा तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः दुग्धनिष्यंदैः सुरभयः सुगंधयः तुषाराद्रिजातत्वे लिंगमिदं ये वाता वायवो दक्षिणेन दक्षिणमार्गेण तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात्तृतीया समेन यातीतिवत् तत्रापि कारणत्वस्य प्रतीयमानत्वात्करणे तृतीयेत्यवत् तृतीयेति भाष्यकारः प्रवृत्ताश्चलिताः हे गुणवति सा पूर्णत्वसौकुमार्यादिगुणसंपन्ने ते तुषाराद्रिवाताः पूर्वं प्रागभिर्वातैस्तवांगं स्पृष्टं भवेद्यदि किलेति संभावितमेतदिति बुध्यत्यर्थः वार्तासंभाव्ययोः किलेत्यमरः तदा मया आलिंग्यन्ते आश्लिष्यन्ते वायूनां स्पर्शत्वेपि अमूर्तत्वेनालिंगनायोगादालिंग्यत इत्यभिधानं मत्तस्योन्मत्तत्वात्प्रलपितमित्यदोषः इति वदन्निरुक्तकारः स्वयं मत्तप्रलापीत्युपेक्षणीयम् ॥ ११२ ॥ संक्षिप्यत इति दीर्घयामाः प्रहराय

भित्त्वा सद्यः किशलयपुटान्देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः आलिं
ग्यंते गुणवति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदंगमेभिस्तवेति ॥ ११२ ॥ संक्षि
प्यंते क्षणमिव कथं दीर्घयामास्त्रियामाः सर्वावस्थास्वहरपि कथं मंदमंदातपं स्यात् इ
त्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ११३ ॥

लूवातैः =

यामा सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः आद्यंतयोरर्धयामयोर्दिनव्यवहारात्त्रियामेति क्षीरस्वामी कथं केन प्रकारेण संक्षिप्यंते लघू क्रियंते अहरपि सर्वावस्थासु सर्वकालेष्वित्यर्थः मंदमंदो मंदप्रकारः प्रकारे गुणवचनस्येति द्विरुक्तिः कर्मधारयवदुत्तरेष्विति कर्मधारयवद्भावात्सुपो लुक् स चासौ आतपश्च संतापः कथं स्यात्तस्मात् हे चटुलनयने चंचलाक्षि इत्थमनेन प्रकारेण दुर्लभं प्रार्थ्यमानमप्राप्यमनोरथं मे मम चेतो गाढं तप्ताभिरतितीव्राभिस्त्वद्वियोगव्यथाभि २८
रशरणमनाथं कृतम् ॥ ११३ ॥

नहैमसरीयद्वर्षृत्य श्रवणोद्विग्नत्वमित्याह नन्विति नन्वित्यामंत्रणे प्रश्नावधारणानुज्ञा[redacted]नुनयामंत्रणेन
न्वित्यमरः ननु प्रिये बहु विगणयन् शापान्ते सत्येवं करिष्यामि इत्यर्थः आवर्तयन् आत्मानमात्मनैव स्वेनैव
प्रकृत्यादिभ्य उपसंख्यानात्तृतीया अवलंबे धारयामि यथा कथंचिज्जीवामीत्यर्थः तत्तस्मात्कारणात् हे
कल्याणि सुभगे त्वत्सौभाग्येन जीवामीति भावः बह्वादिभ्यश्चेति ङीप् त्वमपि नितरामत्यन्तं कातरत्वं भीरु
त्वं मा गमः मा गच्छ गमेर्माङि लुङ् माङ्योग इत्यडागमाभावः नाहं कुत्र खिन्नो राववयोरीदृशो दुःखे कथन
बिभेमि इत्याशंक्याह कस्येति कस्य जनस्यात्यन्तं नियतं सुखमुपनतं प्राप्तं एकान्ततो नियमेन दुःखं वोपन
तं किं तु दशावस्था चक्रस्य रथांगस्य नेमिस्तत्क्रमः चक्रं रथांगं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः
तस्याः क्रमेण परिपाट्याः क्रमः शान्तोपरीपाट्यामिति विश्वः नीचैरधः उपरि च गच्छति प्रवर्तते जंतोः

इत्यात्मानं बहु विगणयन्नात्मनैवावलंबे तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वं
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ११४
शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ शेषान्मासान्गमय चतुरो लोचने मीलयित्वा
पश्चादावां विरहगुणितं तं तमात्माभिलाषं निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ११५

सुखदुःखे पर्यावर्तेते इत्यर्थः ११४ न च निरवधिकमेतद्दुःखमित्याह शापान्त इति शार्ङ्गपाणौ स्थितं यस्य
तस्मिन् सत्यम्भुपमाने त्यादिना बहुव्रीहिः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः इति बहुव्रीहौ पा
णिशब्दस्यान्तरनिपातः भुजंगः शेष एव शयनं तस्मादुत्थिते सति मे शापान्तः शापावसानं शेषानवशिष्टान् चतुरो
मासान् मेघदर्शनप्रभृति हरिबोधनान्तमित्यर्थः दशाहादिवत्साधिकं तु अत्र न विवक्षितमित्युक्तमेव लो
चने मीलयित्वा चक्षुषी निमील्य गमय धैर्येणातिवाहयेत्यर्थः पश्चादनन्तरं त्वं चाहं चावां सदाशी
तिसर्वे ति त्यदादीनां मिथो द्वन्द्वे यत्परं तच्छिष्यत इत्यस्मदः शेषः विरहे गुणितमेवं करि
ष्यामीति मनसा वर्तितं वीप्सायां द्विरुक्तिः आत्मनो रावयोरभिलाषं मनोरथं परिणताः शरच्च

मे० टी० २५

२७

रुस्त्य ३ — तेरु ४ — त्वं

संप्रति तस्या मेघवं वचकत्वप्रकानि ज्ञायाति निगूढमभिधेयमुपदिशति भूय इति हे अबले भूयः पुन
रप्याह त्वं नाम मन्मुखेनेति शेषः मेघवचनमेतत् किमित्यत आह पुरा पूर्वस्मिन्नतीते काले वेधविर
तीते निकटे गासि के पुरे समरः पुरा पूर्वं शयने मे कण्ठलग्ना पि त्वं गलेलग्नस्य कृपम प्यगमन संभ
वेदिति भावः निद्रां गत्वा किमपि केन वा निमित्तेनेत्यर्थः सस्वरं सशब्दं मुक्तैरित्यर्थः रुदती सती विप्र
बुद्धासीदिति शेषः अनन्तरं ऊर्ध्वः पृष्ठतो मे हे कितव कामपि रमयन्मया स्वप्ने दृष्ट इति त्वया
सान्तर्हासं अंतर्हासं यथा तथा कथितमिति तेभर्तारं भूयश्चाह इति योजना ११६ एतस्मादिति एतस्मान्
वेक्ष्णोकान्तात् अभिज्ञायतेऽनेनेति अभिज्ञानं लक्षणं तस्य दानात् अर्पणात् मां कुशलिनं क्षेमवंतं विदित्वा मा
त्वा हे च कितनयने कुलेभवात् कौलीनात् लोकप्रवादात् एतावता कालेन परासुर्नावेदागच्छतीति जनप्रवादा
दित्यर्थः मयि विषये विश्वासिनी मरणशंकिनी माभूर्न भव भवतेर्लुङ् माङ्योगादडागमप्रतिषेधश्च दीर्घ

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ११६ — त्वं ५२
एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगादिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ११७

कालविप्रकर्षान्मूर्वस्नेहनिवृत्तिशंकेत्याह स्नेहानिति किमपि किंवा निमित्तं न विद्यत इति शेषः स्नेहा
न्स्त्रीतिः विरहे सति मूर्खा अन्यविप्रकर्षे सति ध्वंसिनो विनश्वरानाहुः तत्तथा न भवतीत्यभिप्रायः किंतु
ते स्नेहा अभोगात् विरहे भोगाभावात् इष्टोः असत्यप्रतिषेधेपि नञ्समासः इष्टे वस्तुनि विषये उपचितो
रसः स्वादुर्येषां ते उपचितरसाः संतः प्रकृष्टतृष्णा इत्यर्थः रसो गंधरसे स्वादे तिक्तादौ विषरागयोरिति विश्वः
प्रेमराशीभवंति वियोगासहिष्णुत्वमापाद्यंत इत्यर्थः स्नेहप्रेम्णोरवस्थाभेदाद्भेदः तदुक्तं आलोकनाभि
लाषो रागस्नेहौ ततः प्रेमा रतिशृंगारो योगे वियोगतो विप्रलंभश्चेति तदेवस्फुटीकृतं रसाकरे प्रमादि

२५

रत्नो ५

इत्थं कुशलं संदिश्य तत्कुशलसंदेशप्रापणमितां नीयाहृते आश्वास्येति प्रथमविरहेणोदग्रशोकां तीव्रदुः-
खां ते सखीमेवं पूर्वोक्तरीत्या आश्वास्य समुज्जीव्य त्रिनयनस्य त्र्यंबकस्य वृषेणोक्ष्णोत्खाता विदारिताः कूटाः
शिखराणि यस्य तस्मात् कूटात् त्रिशिखरश्रेष्ठागमिष्यमतः शैलात्कैलासादाशु निवृत्तः प्रत्यावृत्तः सन् साभि-
ज्ञानं लक्षणं यथा तथा प्रहितं प्रेषितं कुशलं येषु तैस्तस्यास्त्वत्सख्याः वचोभिर्ममापि प्रातः कुन्दप्रसवमिव शिथि-
लं केवलं मम जीवितमपि धारयेथाः स्थापय प्रार्थनायां लिङ् ॥१९॥ संप्रति मित्रस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कथ-
यति कच्चिदिति हे सौम्य साधो इदं मम बन्धुकृत्यं बन्धुकार्यं त्वया व्यवसितं करिष्यामीति निश्चितं किं कच्चित्काम-
प्रवेदनस्य मतः अभिप्रायज्ञापने कामप्रवेदनेन च ते तूष्णीभावादङ्गीकारं प्रतीयत इति स एवौचित्यमत
आह प्रतीतीति प्रत्यादेशात् न करिष्यामीति प्रतिवचनात् उक्तिराभाषणं वाच्यमादेशो वचनं वच इति प्राचीनाः ५४
वे भवतस्त्वधीरतां गाम्भीर्यं न कल्पयामि न संभावये तर्हि कथमङ्गीकारज्ञानं तत्राह निरतीति शब्दाचितः संनि-

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥१९॥
कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रि-
यैव ॥२०॥ एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या
इष्टान्देशाञ्जलद विचर प्रावृषा संभृतश्रीर्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥२१॥

शब्दोऽपि निर्वचनोऽपि अप्रतिजानानो याचितस्त्वया चातकेभ्यो जलं [illegible] प्रदिशसि ददासि युक्तं चैतत् सतां सत्पु-
रुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैवापेक्षितार्थसंपादनमेव प्रत्युक्तं प्रतिवचनं क्रियैव केवलमु-
त्तरमित्यर्थः नीचो वदति न कुरुते न वदति सुजनः करोत्येव शरदि न वर्षति गर्जति वर्षति वर्षासु निःस्व-
नो मेघः इति भावः ॥२०॥ संप्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यंकरणं प्रार्थयमानो मेघं
विसृजति एतदिति हे जलद सौहार्दात् सुहृद्भावाद्वा हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः

विधुरो वियुक्तः इति हेतोः विधुरं प्रत्यवाये स्यात्कष्टविश्लेषयोरपीति विश्वः मयि विषये ऽनुक्रोशबुद्ध्या
करुणाबुद्ध्या वा आत्मनस्तवोचितमनुरूपमपि मे प्रियमेतत्संदेशाहरणं प्रार्थनां कृत्वा प्रावृषा वर्षा
भिः संभृतश्रीरतिशोभः सन् इष्टानभिलषितान्देशान्विचरेति संबन्धः देशकालाध्वगन्तव्याः कर्म
संज्ञा ह्यकर्मणामिति वचनात् सकर्मकत्वं एवं त्वमपि तत्कालमपि ते तव विद्युता कलत्रेणेति पु
षः विप्रयोगो विरहो माभून्मा अस्तु माङि लुङि स्यादिति लुङ् अत्र काव्यस्य नित्यत्वात् कुर्यादित्याशि
षोऽत्र मा सर्वत्र व्याप्यते विद्युन्नायकेच्छानुरूपिणीमिति सारस्वतालंकारे दर्शनात् काव्यान्ते नाय
केच्छानुरूपो ऽयमाशीर्वादः प्रयुक्त इत्यनुसंधेयं १२० इति श्रीमहामहोपाध्यायकोलाचलमल्लि
नाथसूरिविरचितायां मेघदूतसंदेशव्याख्यायां संजीविनीसमाख्यायां समाप्तोऽयं मेघदूतः ॥
सं० १८ ९९ वैशाखश० १३ तिथौ ७ लिखितं देवीचंद ब्रह्मगोत्रा जसरोटेराजटा सल्हणीटा
श्रमंडल विषे ॥